# Shri Ramakrishna Stotram

# શ્રીરામકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Shri Ramakrishna Stotram

File name : rAmakRRiShNastotram6.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Vamadeva Bhattacharya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણસ્તોત્રમ્

ઓઙ્કાર જ્ઞાન-વેદ્યો યઃ સચ્ચિદાનન્દ-મૂર્તિકઃ
 બ્રહ્મામ્ભોધિ-સમુદ્ભૂત તરઙ્ગો વેદ વિગ્રહઃ ।
ભેદ-દ્વન્દ્વ-ગુણાતીતો માયા-ધૃત-કલેવરઃ
 ચરણ-પ્રણતાય મે વિદધાતુ શિવં સદા ॥ ૧॥

ન-લિન-નયન-નાથં ચાનુકમ્પાધિવાસં
 નિખિલ-નર-શરણ્યં દીનબન્ધું દયાલુમ્ ।
નિરવધિ વિનતાનાં દુઃખનાશે નિયુક્તં
 ભવ-જલનિધિપોતં નૌમિ નિત્યમનન્તમ્ ॥ ૨॥

મોહ-મેઘ-સમાચ્છન્ન-માનસાકાશ-ભાસ્કરઃ!
 કલ્મષ-તમસાચ્છન્ન-રજન્યાશ્ચન્દ્રમાશ્ચ યઃ ।
હરતિ કરુણા યસ્ય સકલં દુષ્કૃતં કૃત-
 મવિરત-કૃપારાશિર્વૃષ્ટોઽસ્તુ તસ્ય મે સદા ॥ ૩॥

ભ-વતિ ચ ભવ-ભઙ્ગો ભાવતો યસ્ય નિત્યં
 ભવ-વિધિ-સુર સઙ્ઘાઃ યસ્ય વૈ મૂર્તિ-ભેદાઃ ।
ભુવન-ભવન-બીજં યત્ર સર્વં સમુત્થં
 ભવતુ હિ મમ તસ્મિન્ ભાવનં સર્વદૈવ ॥ ૪॥

ગ-ગન-સદૃશમીશં વાઙ્મનોબુદ્ધ્યગમ્યં
 ગિરિવર-હિમરાજ-સન્નિભં ધૈર્ય-વાસમ્ ।
સકલ-ભુવન-સંસ્થં વારિનાથ-પ્રશાન્તં
 ધૃત-નરહિત-કાયં સતતં સંસ્મરામિ ॥ ૫॥

વ-હતિ વપુષિ વિશ્વં વિસ્તરં વીર્યયોનિ-
 ર્ધરતિ વિમલ-વેશં દીન-સન્તાન-જન્યમ્ ।
વિષમ-વિષય-બાણ-પ્રોજ્ઝિતં ભક્તિપૂતં
 ચરણ-શરણમેવં માનસં મે પ્રયાતુ ॥ ૬॥

તે-જોભિરસ્પષ્ટ-દિગન્તમાપ્તં
    ભાસ્વદ્ વિભાષા જગદન્તમાપ્તમ્ ।
જ્યોતિર્નિવાસં ચરણાન્તમાપ્તં
    મુહુર્મનો ધ્યાન-નિમગ્નમસ્તુ ॥ ૭॥

રા-શૌ કૃપાવારિનિધેર્જલસ્ય
    સ્નાતો વિશુદ્ધો વિમલાન્તરાત્મા ।
પિબામિ રૂપામૃતમેવ સમ્યક્
    ભક્ત્યઞ્જનાભૃન્નયનસ્તુ દેવ ॥ ૮॥

મ-નુષ્ય-દેવેન્દ્ર-પ્રસેવ્યમાનં
    તાપત્રયોન્મૂલનમિષ્ટમીડ્યમ્ ।
ઉદ્વેજિતઃ સન્ જનિમૃત્યુ જાલૈઃ
    પાદારવિન્દં શરણં પ્રપદ્યે ॥ ૯॥

કૃ-તાન્તક-ત્રાસ -પ્રણાશનાસ્ત્રં
    સમસ્ત -લોકસ્ય પરાયણં વૈ ।
સંશ ૃત્ય શાન્તા હિ ભવન્તુ સર્વે
    કૃશાનુવત્તાવદતર્પ્યકામાઃ ॥ ૧૦॥

ષ્ણા-ન્તં સુમિષ્ટં હિ નિરસ્તપાપં
    સન્દોહ -સન્દેહ-વિનાશમન્ત્રઃ ।
ત્વન્નામ સત્યં સુમહદ્વરેણ્યં
    વિરાજતાં નિત્ય મુખામ્બુજે મે ॥ ૧૧॥

ય-સ્યૈવ કારુણ્યમજસ્ર ધારં
    વિજ્ઞાપ્તવદ્ધર્મ-સમન્વયં વૈ ।
યોષિદ્ધનાનાં પરિવર્જનઞ્ચ
    તમેવ વન્દે ભુવિ રામકૃષ્ણમ્ ॥ ૧૨॥

ઇતિ શ્રીવામદેવ ભટ્ટાચાર્ય પ્રણીતં “શ્રીરામકૃષ્ણસ્તોત્રમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Ramakrishna Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*